① "यज्ञो वै पवित्रम्" इत्यत्र 'पवित्रम्' पदस्य कोऽर्थः ?

(उ.) प्रकर्षेण अवति (प्रकृष्टरक्षकः)।

2. अन्ता जुहूमनु, उपभृतमनु कः ?

उ. आद्यः

3. "देवयुवं विश्ववारम्" 'देवयुवम्' इति पदस्य कोऽर्थः ?

(उ.) देवान् इच्छति इति देवयुः तम्।

4. "ईडामहे तान् देवान् य ईडेन्याः" अत्र 'ईडेन्याः' शब्दस्य कः अर्थः ?

(उ.) स्तुत्याः, स्तुतियोग्याः

5. 'आ नः शृणु, उप न आवर्तस्व' इत्यनेन के कम् अन्वमन्त्रयन्त ?

(3) देवाः यज्ञं अन्वमन्त्रयन्त।

6. "यथा पूर्णपात्रेण सम्प्रदायं चरेयुः" अत्र 'सम्प्रदायम्' इति शब्दस्य कोऽर्थः ?

(उ.) सम्यक् प्रदाय-प्रदाय।

7. यजेति अध्वर्युः कस्मै यज्ञं प्रयच्छति ?

(उ.) होत्रे।

इत्यनेन वाक्येन के होत्रे यज्ञं प्रयच्छन्ति ?

8. 'सप्तोत्तमा'

(उ.) उद्गातारः।

9. "स यत्र हैवमृत्विजः संविदाना यज्ञेन चरन्ति" अत्र 'संविदानाः' पदस्य कोऽर्थः ?

उ. एकमत्यं प्राप्ताः।

10. 'ओ श्रावय' इत्यादिषु पञ्चसु व्याहृतिषु कति अक्षराणि सन्ति ?

(उ.) सप्तदश अक्षराणि।

11. 'अस्तु श्रौषट्' इत्यनेन के अभ्राणि समप्लावयन् ?

(उ.) देवाः।

12. "स यदि वृष्टिकामः स्यात् एतदीष्ट्या वा यजेत" अत्र 'सः' पदेन कः संकेतितः ?

(उ.) यजमानः।

Scanned by CamScanner

(13) प्रयाजाः कति भवन्ति ?

(उ.) पञ्च ।

(14) "देवाश्च वा असुराश्च उभे प्राजापत्याः पस्पृधिरे" अत्र 'पस्पृधिरे' पदस्य कः अर्थः ?

(उ) स्पर्धां कृतवन्तः ।

(15) किं संवत्सरस्य स्वं पयः प्रोक्तम् ?

(उ) आज्यम्

(16) कीदृशेन होमेन एव समृद्धाः आहुतयः ?

(उ.) समिद्धहोमेन ।

(17) "अग्न 'यज यज' इत्येवोत्तरानाह अजामितायै" 'अजामितायै' पदस्य कोऽर्थः ?

(उ.) अनतिरेकाय ।

(18) तनूनपातः केन ऋतुना तादृप्यम् उक्तम् ?

(उ.) ग्रीष्मेण ।

(19) "ताः शरदि बर्हिषो रूपं प्रस्तीर्णाः शेरे" अत्र 'शेरे' इति पदस्य कोऽर्थः ?

(उ.) शेरते ।

(20) कस्य अन्तः स्वाहाकारः ?

(उ.) यज्ञस्य

(21) '०यन्तु वेतु' इति ~~पदस्य~~ द्वयस्य मिथुनं कथम् ?

०यन्तु योषिद्रूपा वेतु च पुरुषः ।

(२२) "यतरं वै संयन्तयोर्मित्रमागच्छति स जयति" अत्र 'संयन्तयोः' पदस्य कोऽर्थः ?

(उ.) युद्धाय प्रयतमानयोः ।

(२३) "अन्योन्तरां जुहूमध्यूहति" अत्र 'अध्यूहति' पदस्य कोऽर्थः ?

(उ.) विधारयति ।

(२४) "स हैव यज्ञो यातयामेवास" अत्र "यातयामः" पदस्य कोऽर्थः ?

(उ.) निर्गतसारः ।

Scanned by CamScanner

(25) कैः अयं पुरुषः समिद्धो भवति ?

(उ.) प्राणैः ।

(26) "प्रजा वा इडः" अस्य वाक्यस्य कोऽर्थः ?

(उ) इडः प्रजारूपाः सन्ति ।

(27) यदा 'द्वौ मम' इति इन्द्रः अब्रवीत् तदा अन्ये किम् अब्रुवन् ?

(उ.) अस्माकं द्वे ।

(28) यदा 'चत्वारो मम' इति इन्द्रः अब्रवीत् तदा इतरे किम् अब्रुवन् ?

(उ.) अस्माकं चतस्रः ।

(29) "तथास्य सर्वं संवृङ्क्ते" अत्र 'संवृङ्क्ते' पदस्य कोऽर्थः ?

(उ.) वर्जयति ।

(30) ऋतवः केषु यज्ञे भागमैच्छन् ?

(उ.) देवेषु ।

(31) "अकृष्टपच्या ओषधयः पेचिरे" अत्र "अकृष्टपच्याः" पदस्य कोऽर्थः ?

(उ.) कर्षणानपेक्षिताः ।

(32) "यथेदमितोऽन्यथाऽसदिति" अस्मिन् वाक्ये क्रियापदं किम् ?

(उ.) असद् = भवेत् ।

(33) "न ह वा आयतनाच्च्यवते" अत्र 'आयतनात्' शब्दस्य कोऽर्थः ?

(उ.) स्वस्थानात् ।

(34) "आभक्तो ह वै तस्यां पुण्यकृत्यायां भवति" अत्र 'आभक्तः' पदस्य कोऽर्थः ?

(उ.) भागवान् ।

(35) कतमेन ~~प्रयाजेन~~ प्रयाजेन देवाः यज्ञम् आप्नुवन् ?

(उ.) चतुर्थेन ।

(36) "स यद्येनान् पुरस्तादसुररक्षसान्यासिसङ्क्षन्" अत्र क्रियापदं किं कश्च तस्यार्थः ?

(उ.) आसिसङ्क्षन् = आसङ्गं प्रतिबन्धम् ऐच्छन् ।

Scanned by CamScanner

(37) "अथ यदत ऊर्ध्वमसंस्थितं यज्ञस्य स्वर्गमेव तेन लोकं समश्नुते" अत्र 'असंस्थितम्' इति पदस्य कोऽर्थः?

(उ.) अवशिष्टम् ।

(38) "स एवं सर्वतोऽग्निभिर्गुप्यमानः" अत्र 'गुप्यमानः' पदस्य कोऽर्थः?

(उ.) रक्ष्यमाणः ।

(39) "स यद्येनं पुरस्ताद्यज्ञस्यानुव्याहरेत" अत्र 'अनुव्याहरेत' पदस्य कोऽर्थः?

(उ.) वैकल्यविषयं वाक्यं ब्रूयात्, निन्द्यात् ।

(40) यद्यन्ततो यज्ञस्य कोऽपि अनुव्याहरेत् तर्हि तं प्रति किं ब्रूयात्?

(उ.) अप्रतिष्ठो दरिद्रः क्षिप्रेऽमुं लोकमेष्यसि ।

(41) कैः यजन् संवत्सरं जयति?

(उ.) प्रयाजैः यजन् संवत्सरं जयति ।

(42) "अक्षय्यो लोकः" अत्र 'अक्षय्यः' पदस्य कोऽर्थः?

(उ.) न क्षेतुं शक्यः ।

(43) "यजमानो ह्येव स्वे यज्ञे प्रजापतिः" अत्र यजमानस्य प्रजापतित्वं कथं संगच्छते?

(उ.) ऋत्विजां दक्षिणादानेन पालनात् प्रजापतित्वम् ।

(44) "यज्ञेन वै देवा इमां जितिं जिग्युः" अत्र 'जिग्युः' इतिपदस्य कोऽर्थः?

(उ.) जितवन्तः

(45) "ते यज्ञस्य रसं धीत्वा" अत्र 'धीत्वा' पदस्य कोऽर्थः?

(उ.) पीत्वा

(46) "श्रमेण ह स्म वै तद्देवा जयन्ति यदेषां जय्यमास" अत्र 'जय्यम्' शब्दस्य कोऽर्थः?

(उ.) जेतुं शक्यम् ।

(47) "अग्नये तिष्ठ' इति ततस्तस्थौ" अत्र 'तस्थौ' क्रियायाः कर्ता कः?

(उ.) पुरोडाशः ।

(48) "स वा एभ्यस्तत पुरोऽदाशयत्" वाक्येऽस्मिन् कस्य शब्दस्य निर्वचनमस्ति?

(उ.) पुरोडाश-शब्दस्य ।

Scanned by CamScanner

(49) "मेघश्चादयानीति" अत्र क्रियापदं किं किञ्च तस्यार्थः ?

(उ) अयानि = गच्छानि ।

(50) "यद्यु एनमुपधावेत्" अत्र 'एनम्' इति सर्वनामपदेन कः ऋत्विक् संकेतितः ?

(उ.) अध्वर्युः ।

(51) "अग्निर्वै सर्वा देवता:" अग्नेः सर्वदेवतात्वे कः हेतुः प्रदर्शितः ?

(उ.) अग्नौ हि सर्वाभ्यो देवताभ्यो जुह्वति ।

(52) "अग्निर्वै देवानाम् अद्धातमाम्" अत्र 'अद्धातमाम्' शब्दस्य कोऽर्थः

(उ.) अतिशयेन प्रत्यक्षफलदः ।

(53) स यदीष्टिं कुर्वीत तर्हि कति सामिधेनीः अनुब्रूयात् ?

(उ) यदि दर्शपूर्णमासात् पृथक् इष्टिं कुर्वीत तर्हि सप्तदश सामिधेनीः अनुब्रूयात् ।

(54) कस्य पुत्रः त्रिशीर्षा षडक्ष आस ?

(उ.) त्वष्टुः ।

(55) कः त्वष्टुः पुत्रस्य शीर्षाणि प्रचिच्छेद ?

(उ.) इन्द्रः ।

(56) त्रिशीर्ष्णः सोमपानाय यन्मुखम् आसीत् ततः कः पक्षी समभवत् ?

(उ.) कपिञ्जलः ।

(57) त्रिशीर्ष्णः सुरापानाय यन्मुखम् आसीत् ततः कः पक्षी समभवत् ?

(उ.) कलविङ्कः ।

(58) "कुविन्मे पुत्रमवधीत्" अत्र 'कुवित्' शब्दस्य कः अर्थः ?

(उ.) बहुप्रकारम्

(59) "स स्वयमेव यज्ञवेशसं चक्रे" अत्र 'यज्ञवेशसम्' पदस्य कोऽर्थः ?

(उ.) यज्ञहिंसापरिहारम् ।

(60) "स यद् वर्धमानः समभवत्" कस्य शब्दस्य निर्वचनमिदम् ?

(उ.) वृत्र-शब्दस्य ।

Scanned by CamScanner

(61) वृत्रं कौ मातेव च पितेव च परिजगृहतुः ?

(उ.) दनुश्च दनायुश्च ।

(62) बह्वाशिने वृत्राय देवाः मनुष्याः पितरश्च कस्मिन् कस्मिन् समये अशनं प्रयच्छन्ति ?

(उ.) देवाः पूर्वाह्णे, मनुष्याः माध्यन्दिने पितरश्च अपराह्णे ।

(63) काभ्यां सूर्याचन्द्रमसौ आप्नोति ?

(उ.) आज्यभागाभ्याम् ।

(64) "उभयतोदन्ताः प्रजाः प्रजायन्ते" 'उभयतोदन्ताः' पदेन के ग्राह्याः ?

(उ.) पुरुषाश्वादयः (उभयतः दन्ताः येषां ते) ।

(65) "सपराः परावतो जगाम" अस्य वाक्यस्य कोऽर्थः ?

(उ.) सः (वृत्रः) अत्यन्तं विप्रकृष्टदेशं गतवान् ।

(66) ऐन्द्राग्नः कतिकपालः पुरोडाशः भवति ?

(उ.) द्वादशकपालः ।

(67) "न वै मेदं धिनोति" अत्र 'धिनोति' पदस्य कोऽर्थः ?

(उ.) प्रीणयति ।

(68) सोमो राजा केषामन्नम् ?

(उ.) देवानाम् ।

(69) "वार्त्रघ्नं वै पौर्णमासम्" इति वाक्यस्य कोऽर्थः ?

(उ.) पौर्णमास्यां क्रियमाणं हविः वृत्रहननसम्बन्धि ।

(70) "तद्दृके दृष्ट्वोपवसन्ति" इति वाक्यस्य कोऽर्थः ?

(उ.) केचन चन्द्रदर्शनयुक्तायां चतुर्दशीयुक्तामावास्यायाम् एव उपवसन्ति ।

Scanned by CamScanner

(1) "एते वै ब्राह्मणा प्रावितारो येऽनूचाना: । एते ह्येनं तन्वते, एत एनं
जनयन्ति । तदु तेभ्यो निह्नुते । तस्मादाह ब्राह्मणा अस्य यज्ञस्य
प्रावितार:" अस्य व्याख्या क्रियताम् ।

(उ.) ये अनूचाना = साङ्गवेदाध्यायिन: ब्राह्मणा: - ब्राह्मणशब्दवाच्या:
ऋत्विज: सन्ति ते यज्ञस्य प्रावितार: - प्रकृष्टरक्षका: प्रकृष्टकर्तार:
वा सन्ति । एते - इमे अनूचाना: ब्राह्मणा: एवं एनं यज्ञं तन्वते -
~~जनयन्ति~~ यज्ञस्य प्रसारं विस्तारं वा कुर्वन्ति । एते ब्राह्मणा एव एनं यज्ञं
जनयन्ति - उत्पादयन्ति । तत् उ तेभ्यो निह्नुते - यत: एतद्भागपाठात् -
निह्नव: कृतो भवति तस्मादयं मन्त्रभाग: पठनीय: । तस्मात् -
तस्मात् कारणात् आह - वक्ति ब्राह्मणा: - ऋत्विग्रूपा: ब्राह्मणा:
अस्य यज्ञस्य प्रावितार: - प्रकृष्टरक्षका: प्रकृष्टकर्तार: वा सन्ति ।

(2) "यज्ञो ह देवेभ्योऽपचक्राम । तं देवा अन्वमन्त्रयन्त - 'आ न: शृणु,
उप न आवर्तस्व' इति । सोऽस्तु तथा' इत्येव देवानुपाववर्त । तेनोपा-
वृत्तेन देवा अयजन्त । तेनेष्ट्वैतदभवन् यदिदं देवा" अस्य भाष्यं लिख्यताम् ।

(उ.) यज्ञ: देवेभ्य: अपचक्राम - अपक्रान्तवान् पलायित: इत्यर्थ: । तं यज्ञं
देवा: अन्वमन्त्रयन्त - अनुनयेन आह्वयन्त । हे यज्ञ! त्वं न:
आशृणु - अस्माकं वचांसि आकर्णय । न: - अस्मान् उपावर्तस्व =
प्रतिनिवर्तस्व । स: यज्ञ: तथा अस्तु = भवतु इति उक्त्वा देवान्
उपाववर्त - देवानां समीपम् आगतवान् न्यवर्तत इत्यर्थ: । तेन -
यज्ञेन उपावृत्तेन - प्रतिनिवृत्तेन पुन: समीपमागतेन यजमा-
नरूपा: देवा: अयजन्त - यागं सम्पादितवन्त: । भाविगत्या यजमानानां
देवत्वव्यवहार: । तेन - यज्ञेन इष्ट्वा - अनुष्ठाय देवा: यत् इदम् = देवा:
देवत्वमस्ति एतत् - एतस्य यज्ञस्य अनुष्ठानेन अभवन् - आसन्
एतस्य यज्ञस्य अनुष्ठानेन यजमाना: देवत्वं प्राप्तवन्त: इत्यर्थ: ।

(3) "ततो देवा अर्चन्तः श्राम्यन्तश्चेरुः, त एतान् प्रयाजान् ददृशुः तैरयजन्त। तैर्ऋतून् संवत्सरं ~~प्रयजन्~~ प्राजयन्। ऋतुभ्यः संवत्सरात् सपत्नानन्तरायन् तस्मात् प्रजयाः। प्रजया ह वै नामैतद् यत्प्रयाजा। इति तथो एवैष एतैर्ऋतून् संवत्सरं प्रजयति। ऋतुभ्यः संवत्सरात् सपत्नानन्तरेति। तस्मात् प्रयाजैर्यजते॥" अस्य व्याख्या विधेया।

ततः- देवासुरस्पर्धाप्रवृतेः अनन्तरं देवाः अर्चन्त= पूजयन्तः श्राम्यन्तः= आत्मनः क्लेशयन्तः चेरुः- अन्वतिष्ठन्। ते देवाः एतान् प्रयाजान्= कर्मविशेषान् ददृशुः= दृष्टवन्तः। तैः=प्रयाजैः अयजन्त- यागम् अकुर्वत। तैः- प्रयाजैः तत्फलभूतान् ऋतून्- ~~प्रयजन्~~। प्राजयन्- प्रकर्षेण वसन्तादीन् तद्द्वारा संवत्सरं सपत्नान्- जितवन्तः। ऋतुभ्यः संवत्सरात् = ऋतुसंवत्सरजयात् अन्तरायन्= विरहितान् अकुर्वन्। तस्मात्- असुररूपान् शत्रून् तस्मात्कारणात् प्रजयसाधनाद् एते प्रजयाः- प्रजयनामवन्तः। प्रजयाः ह वै नामैतद् यत्प्रयाजा= वस्तुतः 'प्रजयाः' इति/एतत् नाम 'प्रयाजाः' इति रूपेण उपलभ्यते। अस्ति तदेव वर्णविपर्ययवशात् 'प्रयाजाः' इति रूपेण उपलभ्यते। तथो... ~~प्रजयति~~= यथा देवाः तथा अयं यजमानः एतैः प्रयाजैः ऋतून् संवत्सरं च जयति। ऋतु संवत्सरजयद्वारा यजमानः सपत्नान्- स्वशत्रून् अन्तरेति- व्यवहितान् करोति। तस्मात्- एतस्माद्धेतोः प्रयाजैः- एतन्नामकैः कर्मविशेषैः यजते= यागं कुरुते।

(4) "पञ्च ममेतीन्द्रोऽब्रवीत् । तत इतरे मिथुनं नाविन्दन् नो इयत ऊर्ध्वं मिथुनमस्ति । पञ्च- पञ्चेति ह्येवैतदुभयं भवति । ततोऽसुराः सर्वं पराजयन्त सर्वस्माद् देवा असुरानजयन् । सर्वस्मात् सपत्नानसुरान् निरभजन् ।" अस्य व्याख्या क्रियताम् ।

(उ.) एकादारभ्य चतुःसंख्यापर्यन्तं संख्यानां लिङ्गवैभिन्न्यं । पञ्च- संख्यायां तद्वैभिन्न्यं नास्ति। इन्द्रः अब्रवीत्- उक्तवान् "मम पञ्च" । ततः इन्द्रवचनानन्तरम् इतरे = अन्ये असुराः मिथुनं = युग्मं पञ्चसंख्यायाः स्त्रीलिङ्गे रूपं न अविन्दन् = न प्राप्नुवन् । अतः - पञ्चसंख्याया आरभ्य मिथुनं नास्ति = स्त्रीपुरुषयोर्वर्तक: रूपभेदः नास्ति । पञ्च--- स्त्रीलिङ्गे अपि पञ्च इत्थम् एव रूपं तथैव पुंल्लिङ्गेऽपि पञ्च एव, अतः पञ्च इति संख्या उभयत्र स्त्रीपुंसयोरविशिष्टा । ततः असुराः - देवविरोधिनः, सर्वं पराजयन्त= निखिलं जेयं जेतुं नाशक्नुवन् अपितु देवाः सर्वस्मात् जयविषयात् असुरान् अजयन् = जितवन्तः । सर्वस्माद् जयविषयात् असुरान् निरभजन् = भागरहितान् कृतवन्तः ।

(5) "ते हैतामृद्धिमेधाञ्चक्रिरे । यामेषामेतामनुशृण्वन्ति । कृषन्तो ह स्मैव पूर्वे वपन्तो यन्ति लुनन्तोऽपरे मृणन्तः । शश्वद्धैभ्योऽकृष्टपच्या एवौषधयः पेचिरे ।" अस्य व्याख्या करणीया ।

(उ.) ऋत्तवः देवानाम् अप्रियान् असुरान् उपावर्तन्त । ते-ऋतवः असुरेषु एताम् - देवैः असहमानाम् एधातुम् - ऋद्धिम् प्रवर्धयाञ्चक्रुः । एषाम् - असुराणाम् एताम् = समृद्धिं देवाः अनुशृण्वन्ति = कर्णपरम्परया आकर्णयन्ति । समृद्धिं प्राप्ताः केचन असुराः पूर्वे = वपनात्पूर्वभागिनः सन्तः कृषन्तः - क्षेत्रकर्षणं कुर्वन्तः, केचन वपन्तः - कृष्टक्षेत्रे बीजवापं कुर्वन्तः, अपरे असुरा लुनन्तः - परिणतशस्यानां लवनं कुर्वन्तः, केचन मृणन्तः - लूनसस्यानि प्रहरन्तः अर्थात् स्तम्बात् धान्यं पृथक् कुर्वन्तः यन्ति = गच्छन्ति स्म । शश्वत् = सदा एभ्यः - एतेषाम् असुराणाम् अकृष्टपच्या - कर्षणानपेक्षिताः ओषधयः = नीवारादयः पेचिरे = परिपक्वाः आसन् ।

Scanned by CamScanner

(6) "यज्ञेन ह वै देवा इमां जितिं जिग्युः येषामियं जितिस्ते होचुः कथं न इदं मनुष्यैरनभ्यारोह्यं स्यादिति। ते यज्ञस्य रसं धीत्वा यथा मधु मधुकृतो निर्दुहेयुर्विदुह्य यज्ञं यूपेन योपयित्वा तिरोऽभवन्निति। तमन्वेष्टुं दध्रिरे।"
अस्य व्याख्या क्रियताम्।

(उ.) यज्ञेन = यज्ञरूपेण साधनेन देवाः इमाम् = एताम् जितिम् = जयं स्वर्गरूपं जिग्युः = जितवन्तः। (इयं) या जितिः = योऽयं जयः येषां देवानाम् आसीत् ते ऊचुः - उक्तवन्तः कथम् - केन प्रकारेण तैः जितं स्वर्गस्थानं मनुष्यैः - तुच्छैः मानवैः न अनभ्यारोह्यम् = आरोहणार्हं न भवेत्। इत्थं परस्परम् उक्त्वा ते यज्ञस्य रसम् = सारभूतं तत्त्वं धीत्वा - पीत्वा यथा - येन प्रकारेण मधुकृतः - मधुकराः मधु निर्धयेयुः - निःशेषेणास्वाद्य पिबेयुः एवं यज्ञं विदुह्य = यज्ञस्य विदोहनं कृत्वा देवाः यूपेन = यज्ञस्तम्भेन योपयित्वा = आच्छाद्य तिरोऽभवन् = तिरोहिताः अभवन्। तं यूपेन योपितं यज्ञं ऋषयः अन्वेष्टुम् - मार्गयितुं दध्रिरे = धृतवन्तः।

(7) "अथ यदब्रवीत् 'इन्द्रशत्रुर्वर्धस्व' इति। तस्माद् हैनमिन्द्र एव जघानाथ यद् शश्वद् अवक्ष्यद् 'इन्द्रस्य शत्रुर्वर्धस्व' इति शश्वद् ह स एवेन्द्रम् अहनिष्यत्" अस्य व्याख्या क्रियताम्।

(उ.) अथ यत् अब्रवीत् = उक्तवान् त्वष्टा यज्ञप्रचारसमये 'इन्द्रशत्रुर्वर्धस्व' वस्तुतः स्वरापराधात् अर्थात् तत्पुरुषस्थाने बहुव्रीहिस्वरप्रयोगात् (बहुव्रीहौ प्रकृत्या पूर्वपदम्, पा. 6.2.1)। तस्मात् = तस्मात् दुष्टस्वरप्रयुक्तिकारणात् एनम् = वृत्रं इन्द्रः जघान = हतवान्। यदि त्वष्टा शश्वत् - अपेक्षितं स्वरमाश्रित्य अवक्ष्यत् - अकथयिष्यत् ('इन्द्रस्य शत्रुर्वर्धस्व' इति व्यस्तरूपेण उच्चारणे स्वरसन्देहः नोदेति) समस्तरूपेण अर्थात् तत्पुरुषस्वरमाश्रित्य (समासस्य, पा. 6.1.223) तर्हि स = वृत्रः एव शश्वत् = अवश्यम् इन्द्रम् = देवराजम् अहनिष्यत् - अमारयिष्यत्।

Scanned by CamScanner

(8) "ते देवा अब्रुवन् न वा इममन्यत् सोमाद्धिनुयात् । सोममेवास्मै
सम्भरामेति । तस्मै सोमं समभरन् । एष वै सोमो राजा देवानाम्
अन्नं यच्चन्द्रमाः । स यत्रैष एतां रात्रिं न पुरस्तान्न पश्चा-
द्ददृशे, तदिमं लोकमागच्छति । स ~~एष~~ इहैवापश्चौषधी-
श्च प्रविशति । स वै देवानां वसु अन्नं ह्येषाम् । तद्
यदेष एतां रात्रिमिहामा वसति तस्मादमावास्या नाम ।" अस्य

व्याख्या क्रियताम् ।

(उ.) ते देवाः अब्रुवन् = उक्तवन्तः न इमम् = इन्द्रम् अन्यत् सोमात् =
सोमव्यतिरिक्तात् द्रव्यात् हिनुयात् = प्रीणीयात् न प्रीणयितुं कश्चित्
शक्नोति इत्यर्थः । एवं विचार्य देवाः अस्मै - इन्द्राय सोममेव सम्भराम =
संबिभराम इत्थं चिन्तितवन्तः । एवंरीत्या तस्मै = इन्द्राय सोमम् =
सोमद्रव्यं समभरन् = सम्भृतवन्तः । योऽस्ति एषः = पुरोवर्ती
अभिषूयमाणः सोमः राजा = राजस्थानीय सोमः चन्द्रमाः = चन्द्ररूपः
स एव देवानाम् = द्योतनादिगुणोपेतानाम् अन्नम् = भोजनम् । स चन्द्र-
रूपः सोमः यत्र = यस्मिन् स्थाने एतां रात्रिम् = अस्यां रात्रौ न पुरस्तात्
न पश्चात् ददृशे = नापि पुरतः नापि पश्चात् दृश्यते । उभयतश्चन्द्र-
दर्शनरहितायां सम्पूर्णामावास्यायामित्यर्थः । तद् = तस्मिन्
समये इमं लोकम् = पृथिवीलोकम् आगच्छति = आयाति । स सोमः
भूलोकमागत्य अपः = जलानि ओषधीः = नीवारादीन्
प्रविशति = प्रविष्टो भवति । स प्रविष्टः चन्द्रमाः देवानाम् =
इन्द्रादीनां वसु - धनम्, अन्नम् = भोज्यम् एषाम् = देवानाम् ।
अथवा सोमः व्रीहियवादिरूपेण अन्नं भवति अतः देवानां धनं भवति ।
हविःप्रकृतितया व्रीह्यादिभिः देवाः तृप्तिमाप्नुवन्ति । इह = भूलोके
एतां रात्रिम् = अपरिदृष्टचन्द्रायां रात्रौ सम्पूर्णतया अमा वसति = अमा सह
वसति, अतोऽर्कचन्द्रमसोः तिथौ सहवासात् सा तिथिः अमावास्या
इति नाम्ना प्रसिद्धाभूत् ।

Scanned by CamScanner